योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः २०६

षडधिकद्विशततमः सर्गः २०६

श्रीवसिष्ठ उवाच ।

यदकारणकं भाति भानं तन्नैव किंचन ।

तत्तथा परमार्थेन परमार्थः स्थितोऽनघ ।। १

अत्रेमं केनचित्पृष्टोऽयमहं तं महामते ।

सम्यग्बोधस्य पुष्ट्यर्थं महाप्रश्नं परं श्रृणु ।। २

अस्त्यब्धिभ्यामुभयतो व्याप्तं ख्यातं जगत्त्रये ।

कुशद्वीपमिति द्वीपं भूमौ वलयवत्स्थितम् ।। ३

तत्रास्तीलावती नाम हैमी पूर्वोत्तरे पुरी ।

दीप्तिज्वालामयस्तम्भप्रोतावनिनभस्तला ।। ४

पूर्वे तस्यामभूद्राजा प्रज्ञप्तिरिति विश्रुतः ।

अनुरक्तजगद्भूतः शक्रः स्वर्ग इवापरः ।। ५

केनचित्कारणेनाहं कदाचित्तस्य भूपतेः ।

प्राप्तः समीपं नभसः प्रलयार्क इव च्युतः ।। ६

पुष्पार्घ्याचमनीयैर्मां पूजयित्वोपविश्य सः ।

मध्ये कथायां कस्यांचिदपृच्छत्प्रणयादिदम् ।। ७

भगवन्सर्वसंहारे जाते शून्यतते स्थिते ।

अवाच्ये परमे व्योम्नि सर्वकारणसंक्षये ।। ८

सर्गारम्भस्य भूयः स्याद्वद किं मूलकारणम् ।

कानि वा सहकारीणि कारणानि कुतः कथम् ।। ९

किं जगत्किं च सर्गादि काश्चिन्नित्यं तमोधराः ।

व्योमसंस्थार्णवाः काश्चित्काश्चित्कृमिकुलाकुलाः ।। १०

काश्चिदाकाशकोशस्थाः काश्चिच्चोपलकोशगाः ।
किंच वा भूतभूतादि कुतो बुद्ध्यादयः कथम् ।। ११
कः कर्ता कोऽथ वा द्रष्टा काधाराधेयता कथम् ।
न कदाचिन्महानाशो जगतामिति निश्चयः ।। १२
समस्तवेदशास्त्रार्थाविरोधाय समर्थितः ।
यथा संवेदनं नाम तथा नामानुभूतयः ।। १३
यतस्ततो वेदनं स्यात्किमनाशमसन्मयम् ।
अन्यच्च जम्बूद्वीपादौ देशेऽद्य मुनिनायक ।। १४
मृतानामग्निदग्धानामिह वा देहनाशिनाम् ।
नरकस्वर्गभोगाय विदेहे देहकारणम् ।। १५
किं तत्स्यात्सहकारीणि कारणान्यथ कानि वा ।
धर्माधर्मावमूर्तौ द्वौ तस्यामूर्तस्य मूर्तता ।। १६
निर्द्रव्यं कुरुते द्रव्यैर्युक्तिरित्यसमञ्जसा ।
मातापित्राद्यभावो हि बीजं किं तत्र कारणम् ।। १७
अन्ये वा हेतवः के स्युः कथं द्रव्यादिसंभवः ।
परलोकोऽस्य नास्तीति यथासंवेदनं स्थितेः ।। १८
समस्तलोकवेदादिविरोधाच्चासमञ्जसम् ।
अनिच्छितेहितैर्दूरदेशान्तरगतैः फलम् ।। १९
प्रजा प्राप्नोत्यसंबन्धैरमूर्तैरत्र कः क्रमः ।
स्तम्भो वरेण सौवर्णो विना हेमगमागमैः ।। २०
क्षणात्संपद्यते तत्र संपत्तिः कथमुच्यताम् ।
विधीनां प्रतिषेधानां निर्निमित्तं विवल्गताम् ।। २१
रूढानामप्यरूढानां किं प्रयोजनमुच्यताम् ।
असदासीज्जगत्पूर्वं सत्संपन्नमनन्तरम् ।। २२
इति श्रुतेः कथं ब्रह्मन्कथ्यतां संगतार्थता ।
अयं भवेत्कथं ब्रह्मा भवेच्चेत्तन्महामुने ।। २३

एवंप्रभावान्नभसः किं सर्वस्मान्न जायते ।

ओषधीनामथार्थानां सर्वेषां वा स्थितिं गताः ।। २४

कथं स्वभावाः कथय यथाबोधं मुनीश्वर ।

एकस्य जीवितं पुंसः सुहृदा मरणं द्विषा ।। २५

मृत्वार्थितं प्रयागादौ क्षेत्रे तत्कथमुच्यताम् ।

खे स्यामक्षयपूर्णेन्दुरिति ध्यायिचितैः फलैः ।। २६

तुल्यकालमनुप्राप्तैः सहस्रेन्दु न किं नभः ।

अन्यच्च ध्यायिनां लक्षैर्ध्यातैका स्त्री यथाक्रमम् ।।२७

जायात्वेन समं कालं लब्धं ध्यानफलं च तैः ।

साध्व्यसाध्वी गृहे भर्तुः संस्थिता तपसा परा ।। २८

तेषां च जाया संपन्ना कथमेतन्महामुने ।

गृहानिर्गच्छमाकल्पं नृपः स द्वीपसप्तके ।। २९

वरत्वं वरशापाभ्यामिति अन्तः क्व तिष्ठति ।

दानधर्मादितपसामौर्ध्वदेहिककर्मणाम् ।। ३०

इहस्थानाममूर्तानां मूर्तं प्रीत्यास्ति सत्फलम् ।

व्यवहर्ता न मूर्तोऽत्र विद्यते लोकयोर्द्वयोः ।। ३१

देशान्तरे भृशं जीवो भृशं कालान्तरेऽपि वा ।

फलं संभवतीयत्तद्विनानुभवनं मुने ।। ३२

असमञ्जसमेवाति कथं स्यात्सुसमञ्जसम् ।

इत्यादिसंशयगणं गिरा शीतावदातया ।

छिन्धि मेऽभ्युदितं भासा सान्ध्यमान्ध्यमिवोडुपः ।। ३३

परमवस्तुनि संशयनाशना-

दुभयलोकहितं भवति स्फुटम् ।

तदिह मे कुरु साधुसमागम-

स्तनुफलो भवतीह न कस्यचित् ।। ३४

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० नि० उ० महाप्रश्नो नाम षडधिकद्विशततमः सर्गः ।। २०६ ।।